॥ अणुभाष्यम ॥

॥ प्रथमॊऽध्यायः ॥

नारायणं गुणैः सर्वैरुदीर्णं दॊषवर्जितम ।
ज्ञॆयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यतॆ ॥ १ ॥

विष्णुरॆव विजिज्ञास्यः सर्वकर्ताऽऽगमॊदितः ।
समन्वयादीक्षतॆश्च पूर्णानंदॊऽंतरः खवत ॥ २ ॥

प्रणॆता ज्यॊतिरित्याद्यैः प्रसिद्धैरन्यवस्तुषु ।
उच्यतॆ विष्णुरॆवैकः सर्वैः सर्वगुणत्ववतः ॥ ३ ॥

सर्वगॊऽत्ता नियंता च दृश्यत्वाद्युज्झितः सदा ।
विश्वजीवांतरत्वाद्यैर्लिंगैः सर्वैर्युतः स हि ॥ ४ ॥

सर्वाश्रयः पूर्णगुणः सॊऽक्षरः सन हृदब्जगः ।
सूर्यादिभासकः प्राणप्रॆरकॊ दैवतैरपि ॥ ५ ॥

ज्ञॆयॊ न वॆदैः शूद्राद्यैः कंपकॊऽन्यश्च जीवतः ।
पतित्वादिगुणैर्युक्तस्तदन्यत्र च वाचकैः ॥ ६ ॥

मुख्यतः सर्वशब्दैश्च वाच्य ऐकॊ जनार्दनः ।
अव्यक्तः कर्मवाक्यैश्च वाच्य ऐकॊऽमितात्मकः ॥ ७ ॥

अवांतरं कारणं च प्रकृतिः शून्यमॆव च ।
इत्याद्यन्यत्रनियतैरपि मुख्यतयॊदितः ।
शब्दैरतॊऽनंतगुणॊ यच्छब्दा यॊगवृत्तयः ॥ ८ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितॆ ब्रह्मसूत्राणुभाष्यॆ प्रथमॊऽध्यायः ॥

www.yousigma.com